श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सारनाथस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सारनाथस्तोत्रम् ॥

सारक्षेत्रपतिं सरोजजपतिं सारातिदूरं सदा
सारं सारविमानगं सुरवरं सारेश्वरीनायकम्।
नित्यं सारसरोवरे विरचितस्नानद्विजाराधितं
संसाराब्धितरिं सरोजनयनं तं सारनाथं भजे॥ 1 ॥

सर्वतत्त्वालय श्रीमन् व्याकृताघशिरो हरे।
परमात्मन् सारनाथ रक्ष माम् शरणागतम्॥ 2 ॥

समस्तजगदाधार शङ्खचक्रगदाधर।
सारनाथ ममानुज्ञां देहि त्वत्तीर्थसेवने॥ 3 ॥

सारक्षेत्रे सारनाथः सारपुष्करिणीतटे।
रमया सारनायक्या विमाने सारसंज्ञके॥ 4 ॥

अव्याजकृपया नित्यं तत्र सन्निहितो हरिः।
श्रिताभीष्टं ददन्नित्यं मोदते सूरिभिः सह॥ 5 ॥

पञ्चसारमिदं नित्यं यः स्मरेत् प्रयतः पुमान्।
स सर्वानर्थितानर्थान् ध्रुवमाप्नोति पूरुषः॥ 6 ॥

नाच्यारुचारुवदनाम्बुजराजहंसं
सत्सारवच्चरितपूर्णमुदारहासम्।
संसारसागरतरिं हृदयाब्जवासं
तं श्रीनिवासमभजं स्वरमावतंसम्॥ 7 ॥

नमस्ते सारनाथाय कावेरीवरदायिने।
सर्वपापविनाशाय सर्वाभीष्टप्रदायिने ॥ 8 ॥

सारक्षेत्रनिवासाय सारपुष्करिणीतटे।
यस्य प्रसादात् कावेरी गङ्गाधिक्यं पुरा गता ॥ 9 ॥

भक्ताभीष्टफलप्रदाङ्घ्रियुगलं कौशेयराजत्कटिं
लक्ष्मीमङ्गलमन्दिरोरसि लसन्मुक्तावलीकौस्तुभम्।
हस्तैः शङ्खरथाङ्गपङ्कजगदा बिभ्राणमभ्राकृतिं
राकाचन्द्रमुखं सुजातमकुटं श्रीसारनाथं भजे ॥ 10 ॥

सारक्षेत्रे पवित्रे सुजनसुखकरे सारकासारतीरे
साराख्यव्योमयाने विरचितनिलयः सारनेत्र्या समेतः।
साराम्भोधानकञ्जायितनयनयुगः फालसौन्दर्यसारः
संसाराब्धेरसारात् स हरिरवतु मां सारनाथो रमेशः ॥ 11 ॥

आलोड्य चिन्तितपदा श्रुतिराह यस्मा -
दास्तम्बमाम्बुजभवेन्दुशिरोमणिभ्याम्।
उत्पत्तिजीवनलयानुदितान्ययोग -
हानं श्रियःपतिममुं हृदि चिन्तयामः ॥ 12 ॥

यस्मादथर्वशिखया द्रुहिणस्वमूर्ति -
रुद्रेन्द्रमूलजगतोऽभिहिता प्रसूतिः।
पैङ्ग्यश्रुतिस्फुटगतिप्रतिपन्नरूपा
पद्मासनं तमनिशं प्रणमामि देवम् ॥ 13 ॥

यत्पत्नीदृष्टिलेशाद् द्रुहिणहरमुखा लब्धसत्ताः सुरेन्द्रा
यद्भक्तानां नियम्याः सकलसुरगणा ब्रह्मरुद्रेन्द्रमुख्याः।
यत्पादक्षालनाम्बु प्रथयति शुचितां चन्द्रमौलेश्च लोके
तस्मै नारायणाय प्रवितनुत नुतिं सर्वभूतान्तराय ॥ 14 ॥

ब्रह्मेशादेर्नियन्ता परमपुरुष इत्याह नित्या हि वाणी
पुंवाक्यैस्तस्य बाधः कथमिव भविता प्राप्तदोषप्रभेदैः।
दूरापास्तं च गौरीमधुमथनभिदाबाधकं वाक्यजालं
लक्ष्मीशं तं प्रपद्ये प्रतिभटरहितप्राभवोद्भूतिभव्यम्॥ **15** ॥

वेदान्तेषु प्रतीतात् तदितरभजनाद् यस्य भक्तिः प्रकृष्टा
तत्रैव स्थानमग्र्यं स्फुरति विधिशिवस्थानतोऽप्यूर्ध्वदेशे।
लक्ष्म्या सार्धं तमेकं हृदयसरसिजे ब्रह्मविद्याप्रदात्र्या
देवं नारायणाख्यं भवजलधिसमुत्तारणं संश्रयामः॥ **16** ॥

॥ श्री सारनाथस्तोत्रं समाप्तम्॥